# Rama Ashtakam

# રામાષ્ટકમ્ ૧૧

## Document Information

Text title : Rama Ashtakam

File name : rAmAShTakam11.itx

Category : raama, moropanta, aShTaka

Location : doc_raama

Author : Mayurakavi or Moropanta

Proofread by : Rajesh Thyagarajan

Description/comments : Stotras composed by Moropanta mayUrakavi

Latest update : December 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 23, 2023

*sanskritdocuments.org*

# રામાષ્ટકમ્ ૧૧

(દ્વિતીયમ્)

(પુષ્પિતાગ્રાવૃત્તં)

નવજલધરનીલમીડયમેકં કલિમલનાશનકીર્તનં સુભદ્રં ।
પ્રશમપરમુનીન્દ્રગીતકીર્તિં દશરથનન્દનમીશ્વરં નમામિ ॥ ૧॥

જલરુહદલલોચનં પ્રશાન્તં પતિતજનાવનદક્ષમીશિતા રં ।
વિપદઘગિરિવિજસારપાદામ્બુજરજસં રઘુનાયકં નમામિ ॥ ૨॥

ભજદખિલજનૈકકામક લ્પદ્રુમમમલામિત સદ્ગુણામૃતાબ્ધિં ।
શિવહૃદયનિવાસમાદિદેવં દશમુખકાલમનન્તમાશ્રયામિ ॥ ૩॥

સકરુણમવને રતં નિજાનામુરુભુજવિક્રમનિર્જિતારિદર્પં ।
મુનિજનનુતનીતિવર્મનિષ્ઠં પરમપદપ્રદમન્તરાશ્રયેઽહમ્ ॥ ૪॥

(૧)શરધિશરશરાસનાસિવલ્લીધરમરિકાનનદાવમુગ્રવીર્યં ।
શરણદચરણં રણપ્રચણ્ડં વિધિમુખમાર્ગિતમુક્તિવર્મ વન્દે ॥ ૫॥

શુચિમુચિતચરિત્રમઞ્ચિતાઙ્ઘ્રિં ચતુરચકોરકચન્દ્રમિન્દ્રનાથં ।
અચલમૃચિ(૨) ગતં ચરાચરેશં ચિરતરમચ્યુતમીશમાનતોઽસ્મિ ॥ ૬॥

પવનસુતરથં કકુત્સ્થનાથં વિમલકથં ચતુરાસ્યગીતગાથં ।
કુશિકમુનિવશં નૃપાલવેષં પ્રશમિતતાપમપાસ્તપાપમીડે ॥ ૭॥

સુખકરમુરગેન્દ્રશય્યમાર્યં વરદમુરુક્રમમાશ્રિતામદ્રું ।
દ્રુહિણગુરુમુદારમાદ્વિતીયં નુમ ઉદરીકૃતદીનમબ્જનાથમ્ ॥ ૮॥

ઇતિ શ્રીરામનન્દનમયૂરેશ્વરકૃતં શ્રીરામાષ્ટકં સમ્પૂર્ણમ્ ।

ટિપ્પણિ

૧। શરધી તૂણીરૌ ચ શરાશ્ચ શરાસનં ધનુશ્ચાસિવલ્લી ખડ્ગલતા ચ તાસાં ધરમ્ ।

૨। ઋચિ વેદેષુ ગતં વેદવેદ્યમિત્યર્થઃ ।

Proofread by Rajesh Thyagarajan

*Rama Ashtakam*

pdf was typeset on December 23, 2023

Please send corrections to *sanskrit@cheerful.com*